# Shri Hanumadacharyapranitah Shrihanumat Stava

# શ્રીહનુમદાચાર્યપ્રણીતઃ શ્રીહનુમત્સ્તવઃ

## Document Information

Text title : Shri Hanumadacharyapranitah Shrihanumat Stava

File name : hanumatstavaHhanumadAchArya.itx

Category : hanumaana, rAmAnanda

Location : doc_hanumaana

Author : hanumadAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીહનુમદાચાર્યપ્રણીતઃ શ્રીહનુમત્સ્તવઃ

આનન્દભાષ્યકૃદ્રામાનન્દં રામં તથેશ્વરમ્ ।
ભાવાનન્દં ગુરું નત્ત્વા કુર્વેઽહં હનુમત્સ્તવમ્ ॥ ૧॥

સ્ફુરદ્વિદ્યુદુલ્લાસવાલાગ્રઘણ્ટા ઝણત્કારનાદપ્રવૃદ્ધાટ્ટહાસમ્ ।
ભજે વાયુસૂનું ભજે રામદૂતં ભજે વજ્રદેહં ભજે ભક્તબન્ધુમ્ ॥ ૨॥

પ્રપન્નાનુરાગપ્રભાકાઞ્ચનાઙ્ગં જગદ્ભીતશૌર્યં તુષારાદ્રિધૈર્યમ્ ।
તૃણીભૂતહેતિં રણોદ્યદ્વિભૂતિં ભજે વાયપુત્રં પવિત્રાત્ પવિત્રમ્ ॥ ૩॥

ભજે હેમરમ્ભાવને નિત્યવાસં ભજે બાલભાનુપ્રભાચારુહાસમ્ ।
ભજે ચન્દ્રિકાકુન્દમન્દારહાસં ભજે સન્તતં રામસર્વેશદાસમ્ ॥ ૪॥

ભજે લક્ષ્મણપ્રાણરક્ષાસુદક્ષં ભજે તોષિતાનેકગીર્વાણપક્ષમ્ ।
ભજે ઘોરસઙ્ગ્રામસીમાહતાક્ષં ભજે રામમન્ત્રપ્રચારે સુદક્ષમ્ ॥ ૫॥

મૃગાધીશનાથં ક્ષિતિક્ષિપ્તપાદં ઘનાક્રાન્તજઙ્ઘ કટિસ્થોડુસઙ્ઘમ્ ।
અજાણ્ડસ્થકેશં ભુજશ્લેષિતાશં જયશ્રીસમેતં ભજે રામદૂતમ્ ॥ ૬॥

ચલદ્વાલઘાતં ભ્રમચ્ચક્રવાલં કઠોરાટ્ટહાસપ્રભિન્નાબ્ધિકાણ્ડમ્ ।
મહાસિંહનાદાદ્ વિશીર્ણત્રિલોકં ભજે ચાઞ્જનેયં પ્રભું વજ્રકાયમ્ ॥ ૭॥

રણે ભીષણે મેઘનાદે સનાદે સરોષં સમારોપ્ય સૌમિત્રિમંસે ।
ઘનાનાં ખગાનં સુરાણાં ચ માર્ગે નટન્તં જ્વલન્તં હનૂમન્તમીડે ॥ ૮॥

નખધ્વસ્તજમ્ભારિદમ્ભોલિધારં ભુજાગ્રેણ નિર્ભૂતકાલાગ્રદણ્ડમ્ ।
પદાઘાતભીતાહિજાતાઽધિવાસં રણક્ષોણિદક્ષં ભજે પિઙ્ગલાક્ષમ્ ॥ ૯॥

મહાભૂતપીડાં મહોત્પાતપીડાં મહાવ્યાધિપીડાં મહાધિપ્રપીડામ્ ।
હરત્યાશુ તે પાદપદ્માનુરક્તિઃ નમસ્તે કપિશ્રેષ્ઠરામપ્રિયાય ॥ ૧૦॥

સુધાસિન્ધુમુલ્લઙ્ઘય સાન્દ્રે નિશીથે સુરાન્તઃ પ્રગુપ્તાં સુધામોષધીં તામ્ ।
રણાદ્ દ્રોણશૈલેયસારેણ નેતું વિનાઽજ ત્વયા કઃ સમર્થઃ કપીન્દ્ર ॥ ૧૧॥

સમુદ્રં તરઙ્ગાદિરૌદ્રં વિનિદ્રો વિલઙ્ઘયોઽસઙ્ઘં સ્તુતો મર્ત્યસઙ્ઘૈઃ ।
નિરાતઙ્કમાવિશ્ય લઙ્કાં વિશઙ્કો ભવાનેવ સીતાવિયોગાપહારી ॥ ૧૨॥

ક્ષમાનાથનામ્ના ક્ષમાજેશનામ્ના હ્યશોકાં સશોકાં વિહાયાપ્રહર્ષાત્ ।
વનં તદ્ ઘનં જીવનં દાનવાનાં વિપાટ્ય પ્રહૃષ્યન્ હનૂમઁસ્ત્વમેવ ॥ ૧૩॥

જને હારયન્ ભીતિપીડાં શરીરે નિરૂઢં રણારૂઢગાઢપ્રતાપ ।
ભવત્પાદભક્તિં ભવદ્ભક્તિરક્તિં કુરુ ત્વં હનૂમન્ પ્રભો મે દયાલો ॥ ૧૪॥

નમસ્તે મહાસત્ત્વવાહાય તુભ્યં નમસ્તે મહાકાલકાલાય તુભ્યમ્ ।
નમસ્તે મહામર્ત્યકાયાય તુભ્યં નમસ્તે સદા સ્વામિકાર્યાય તુભ્યમ્ ॥ ૧૫॥

દ્વારપીઠેશ્વરશ્રીમધનુમદાર્યનિર્મિતઃ ।
સ્તવોઽયં પઠતાં ભૂયાત્ સર્વસૌખ્યપ્રદાયકઃ ॥ ૧૬॥

ઇતિ શ્રીહનુમદાચાર્યપ્રણીતઃ શ્રીહનુમત્સ્તવઃ સમ્પૂર્ણઃ ।

Encoded and proofread by Mrityunjay Pandey

---

*Shri Hanumadacharyapranitah Shrihanumat Stava*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*